Postal Regd.No. GAMC- 1553/2019-2021 ISSN 2454-6313

संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १६ अङ्क : १८३
ऑगष्ट - २०२१

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### गृहे गृहे वीणावादनम्

स्त्रीणां चित्तं दुर्ज्ञेयम् इति महाभारतकारस्य मतम् । परम् अस्मदीयाः अनुभवाः तु भिन्नाः एव । एतादृशैः अनुभवैः एव गुजराते चन्द्रकान्तः बक्षी महतीं प्रसिद्धिं प्राप्तवान् । सः स्वीयेन वक्रलेखनेन प्रीतिभाजनम् अपि अभवत् । यद्यपि सः लिखितवान् प्रचुरप्रमाणेन, तथापि गुणवत्तरं स्वल्पं दत्तवान् । तस्य साहित्यं नितराम् आलोडयन् पाठकः कदाचित् किमपि सारभूतं लभते । बक्षीवर्यः स्त्रीस्वभावं प्रति नानास्थानेषु लिखितवान् । अहमपि ततः एव किमपि प्राप्तवान् । बक्षीवर्यः लिखति यत् पत्नी यदा जीवनस्य पञ्चाशद्वर्षाणि अतिक्रामति तदा तस्यां पत्युः परिष्कारे महान् आग्रहः जायते । सा लघुषु विषयेषु पतिम् एवं पीडयति –(अत्र उल्लेखनीयं यत् सम्प्रति स्त्रीपुरुषयोः उभयोः व्यवहारे नीतरां समानता दृश्यते ।) प्रभाते पञ्चवादने जागरित्वा उत्क्रोशति – 'भवान् शय्यां कदा त्यक्ष्यति ? अहं प्रच्छदं स्वच्छं कर्तुम् इच्छामि । रविवासरस्य सूर्योदयः सदैव शय्यायाम् एव भवति ।'

'दन्तधावनम् अवधानेन करोतु । अधः सर्वत्र जलसेचनं भवति ।' 'शौचालयात् निर्गत्य पादौ पादकटे मार्जयतु । भवान् सर्वत्र पादचिह्नानि करोति । मम तु समग्रं वयः मार्जने एव यातम् ।' 'भवतः अन्तर्वस्त्रं कपाटिकायां वर्तते । तत् गृहीत्वा स्नानार्थं गच्छतु । भवान् प्रतिदिनं विस्मरति ।' 'स्नानगृहात् निर्गत्य गात्रमार्जनी बहिः सूत्रे लम्बयितुं न शक्यते ? तदपि मम एव कर्तव्यम् ?' ' केशतैलस्य कूर्पीं सम्यक् पिधाय स्थापयति चेत् भवतः सरस्वती शापं ददाति ?'

'एतानि सर्वाणि पुस्तकानि गङ्गायै समर्पयतु । अत्र स्थानं नास्ति ।'

'चायेन विना व्याकरणस्य विस्मरणं भवति ? चायपात्रम् अत्र-तत्र न स्थापयतु । एवं विज्ञापनं टाटा-चायस्य स्वामी अपि न करोति ।' ' दूरवाण्या वार्तालापं कुर्वन् भवान् गृहात् बहिः किमर्थं गच्छति ? ग्रामजनेभ्यः अपि किमपि निवेदनीयम् अस्ति ?' 'दूरवाण्याम् एव अङ्गुलीं कर्तुम् इच्छति चेत् भवान् मां किमर्थम् आहूतवान् ?'

'भवान् भोजनं कृत्वा तत्कालं पर्यङ्के पतति तत् उचितं नास्ति । दर्पणे उदरम् अपि कदाचित् पश्यतु । शरीरे केवलम् उदरं दृश्यते !' 'वार्तापत्रे सर्वमेव अक्षरशः पठनीयम् इति कस्मिन् शास्त्रे लिखितम् अस्ति ? भवान् यत् पठति तत् विवाहोत्सुकानां विज्ञापनम् अस्ति ।'

मित्राणि ! विवाहितानां पुरुषाणाम् एतदेव वीणावादनम् अस्ति तथापि तस्याः वीणायाः एका तन्त्री त्रुट्यति चेत् जीवनं शून्यं भवति । वयमपि तादृशं शून्यं जीवनं न इच्छामः । सत्यम् ?

## सौम्यं स्वभावतः भाव्यम्

व्योम शाहः



अमेरीकादेशे फिलाडेल्फिया नाम नगरम्। नगरं लघु आसीत्। सर्वेऽपि नगरजनाः सुखेन जीवनं यापयन्ति स्म।

कदाचिद् कौचित् वृद्धौ दम्पती विश्वभ्रमणं कुर्वन्तौ आस्ताम् । तस्मिन् एव विश्वभ्रमणस्य शृङ्खलायां तौ तत्र फिलाडेल्फियानगरम् आगतवन्तौ । तौ तत्र नगरे मोदेन अभ्रमताम्। निशा अभवत् किन्तु तौ पर्यटताम्। अथ कदाचित् तत्र वृष्टिः आरब्धा। तयोः आश्रयस्थानं नगरात् बहिः आसीत्। अतः तौ वसतिगृहस्य अन्वेषणार्थम् इतस्ततः अभ्रमताम्। सर्वत्र अपि प्रकोष्ठाः अतिथिभिः प्रपूरिताः एव आसन्। तदा वृद्धः द्वयोः भवनयोः मध्ये किञ्चिद् एकं लघु वसतिगृहं दृष्टवान्। सपत्नीकः सः तत्र गतवान्। वसतिगृहस्य व्यवस्थापकः कश्चिद् नवयुवकः आसीत्।

''आवां रात्रिं यावत् एकं प्रकोष्ठम् इच्छावः।'' इति वृद्धः वसतिगृहस्य व्यवस्थापकम् उक्तवान्।

''क्षम्यताम् आर्य ! किन्तु अद्य सर्वेऽपि प्रकोष्ठाः प्रपूरिताः एव सन्ति ।'' इति व्यवस्थापकः वृद्धाय अकथयत्। वृद्धः निराशया वृद्धां प्रति अपश्यत्। तौ यदा गमनार्थं प्रयाणम् अकुरुतां, तदैव–

''आर्य ! क्षणं शृणोतु। अस्माकं वसतिगृहे सर्वे प्रकोष्ठाः प्रपूरिताः सन्ति। किन्तु रात्रौ एकवादने मेघे वर्षति भवन्तौ एवं गच्छन्तौ द्रष्टुं न शक्नोमि। अतः यदि भवतोः इच्छा स्यात् तर्हि भवन्तौ मम प्रकोष्ठे स्थातुं शक्नुताम्।'' इति व्यवस्थापकः उक्तवान्। व्यवस्थापकस्य वचनं श्रुत्वा वृद्धः चिन्तामग्नः जातः।

''यदि भवतोः आनुकूल्यम् अस्ति तर्हि मम चिन्तां मा कुरुताम्। अहं तु अत्र एव भविष्यामि। मम प्रकोष्ठः प्रासादः इव बृहद् नास्ति किन्तु रात्रिं यावत् आवासं कर्तुं शक्यते।'' इति उक्त्वा वसतिगृहस्य व्यवस्थापकः वृद्धस्य मनसः चिन्तां निराकरोत्। ''अस्तु नाम। तथा कुर्वः।'' इति वृद्धः प्रत्यवदत्। सः युवकः तस्मै वृद्धाय स्वकीयस्य प्रकोष्ठस्य कुञ्चिकाम् अददात्। दम्पती तत्र गत्वा विश्रामं कृतवन्तौ। रात्रिः समाप्ता। वृष्टिः अपि स्थगिता।

प्रातःकाले स्नानादिकं समाप्य तौ प्रकोष्ठात् निर्गतौ । वृद्धः व्यवस्थापकाय प्रकोष्ठस्य कुञ्चिकां प्रत्यर्पयन् उक्तवान् – ''धन्यवादाः पुत्र ! इदृशे काले भवान् आवयोः वृद्धयोः सहाय्यं कृतवान्।'' वृद्धः प्रकोष्ठस्य शुल्कादिकं दत्तवान्।

''भवादृशाः कार्यकराः अद्वितीयाः सन्ति। इदानीन्तनकाले ये जनाः सौम्याः सहाय्यार्थं च तत्पराः स्युः, तादृशाः दुर्लभाः एव। भवता तु अमेरीकादेशस्य सर्वोत्कृष्टस्य वसतिगृहस्य प्रबन्धकत्वेन भवितव्यम्। कदाचित् अहं भवते एकतमस्य वसतिगृहस्य निर्माणं करिष्यामि।'' इति वृद्धः सस्मितम् व्यवस्थापकम् उक्तवान्। व्यवस्थापकः अपि स्वीयां धन्यताम् प्रदर्शितवान्।

मासाः व्यतीताः। वर्षद्वयं व्यतीतम्। सः युवकः इदानीमपि तत्रैव वसतिगृहे कार्यं कुर्वन् आसीत्। एकदा सः एकं पत्रं प्राप्तवान्। सः वृद्धः एव तत् पत्रं प्रेषितवान् आसीत्। पत्रे युवकस्य कृते न्यू-योर्क-नगरस्य विमानेन गमनागमनस्य चिटिका आसीत्। पत्रे लिखितम् आसीत् यत्- 'समयं निष्कास्य युवकः वृद्धं मिलेत्' इति। युवकः न्यू-योर्क-नगरं प्राप्तवान्।

तदा वृद्धः तम् एकं स्थानम् अनयत्। तत्र एकं गगनावलम्बिभवनं दृष्ट्वा सः युवकः स्तब्धः अभवत्। तत् भवनं दर्शयन् -''अहम् इच्छामि यद् भवान् एतस्य वसतिगृहस्य प्रबन्धकः भवतु'' इति वृद्धः युवकम् अवदत्। अयं वृद्धः कः आसीत् इति भवन्तः जानन्ति किम् ? अयं वृद्धः विलियम्-वाल्डोर्फ-एस्टोरः आसीत् येन वाल्डोर्फ-एस्टोरिया-होटल इति प्रसिद्धं वसतिगृहं रचितम् आसीत्। सः व्यवस्थापकः कः आसीत् इति भवन्तः जानन्ति ? सः आसीत् जॉर्ज-सी-बोल्ड-महोदयः यः तस्य वसतिगृहस्य प्रथमः मुख्यप्रबन्धकः अभवत्।

जीवने वयं न जानीमः यद् अस्माकं किं कृत्यं किं वा अकृत्यम् अस्मदीयं भविष्यम् उज्जवलं तामिस्रं वा करिष्यति। अतः अस्माभिः सदैव सर्वैः सह प्रीत्या व्यवहारः आचरणीयः।

वसतिगृहम् - hotel, व्यवस्थापकः - manager, प्रासादः - palace

**त्रिमुनिव्याकरणम्**

(१.१.८) इति सवर्ण-संज्ञा-विधायके सूत्रे 'ॠलृवर्णयोर्मिथः सावर्ण्यवाच्यम्' इति वार्तिकम् कृतम्। एवमेव 'एत्येधत्यूठ्सु (६.१.८९) इत्यत्र एङिपररूपम् (६.१.९४)' इत्यादिषु च अनेकानि वार्तिकानि न्यासिषत।

पुनश्च समतीते कतिपये समये खृष्ट-समा-समारम्भात् प्राक् सार्धैकशतप्राये भगवतः पाणिनेः सूत्राणि तथा भगवतः कात्यायनस्य वार्तिकानि च प्रकृत्य महर्षिणा भगवता पतञ्जलिना सूत्रानुसारिभिः पदैः सूत्रार्थं विवृण्वता विवरणघटकानि स्वानि पदानि च व्याचक्षाणेन भाष्यं समभाषि। तस्य च न केवलं व्याख्यातृत्वम् अपितु इष्ट्यादि-(त्यदादीनामः ७.२.१०२ इत्यादि-स्थले 'द्विपर्यन्तानामेवेष्टिः' इत्यादि) - कथनेन अन्वाख्यातृत्वेन सह विविधानां न्यायबीजानां न्यसनाद् इतर-शास्त्र-भाष्य-वैलक्षण्यात् 'महाभाष्यम्' इति नामधेयम्। तदिदं सनातन-प्रशंसा-भाजनतां भजमानया पुरु-प्रसादशीलया शैल्या लिखितं प्रणेतुरनारतमक्षय्यं यशःस्रोतः प्रवाहयद्राजतेतमाम्।

भगवद्भिः त्रिभिरेभिः मुनिभिः अष्टाध्यायीव्याकरणस्य यत् स्वरूपम् उपास्थापि तदेव राशीकृतमुच्यते शब्दानुशासनं पाणिनीयम्। अत्रेदमवधेयम्-वंशो द्विविध उपदिष्टः, विद्यया, जन्मना च। उत्पादकोत्पाद्यक्रमेण सञ्जातानां जनानां परम्परा जन्मवंशः तथा व्याख्येयव्याख्यातृक्रमेण किम्वा गुरुच्छात्रक्रमेण कस्मिँश्चिदपि शास्त्रे अधीतिनां विद्यावतां परम्परा विद्यावंशः। विवृतचरे व्याकरणे पाणिनीये सूत्रवार्तिकमहाभाष्यकाराः पाणिन्यादयस्त्रयः एकवंश्याः सुतरां सिद्ध्यन्ति इति कृत्वा 'त्रयो मुनयः वंश्याः इति विग्रहे' सङ्ख्या वंश्येन (२.१.१९) इति समासे कृते 'त्रिमुनि' व्याकरणस्य इति रूपं निष्पाद्यते। किन्तु विद्या-विद्यावताञ्च अभेदविवक्षायां व्याकरणेन सह सामानाधिकरण्येन 'त्रिमुनि' पदस्य प्रयोगात् पाणिनीयं शब्दानुशासनं 'त्रिमुनि व्याकरणम्' इति साधु समुदीर्यते।

# त्रिमुनिव्याकरणम्

डॉ. सुखेश्वरः झा

व्याक्रियन्ते – व्युत्पाद्यन्ते शब्दाः अनेन इति व्याकरणं, शब्दसाधुत्वप्रदर्शकं शास्त्रम्। समस्ते एव संस्कृत-वाङ्मये यत् किमपि प्राचीनैः अर्वाचीनैर्वा उपन्यस्तं तस्य सर्वस्य ज्ञानाय यस्य शास्त्रस्य बोधस्य प्रथमा अपेक्षा कथ्यते तदेव इदं प्रशस्तं शब्दानुशासनं नाम व्याकरणशास्त्रम्। अनेकेषु च तेषु व्याकरणशास्त्रेषु यत् पाणिनिना प्रणीतं तत् 'त्रिमुनिव्याकरणम्' इत्यभिधीयते।

व्याकरणशास्त्रस्य अत्र ज्ञानप्रधाने भारतवर्षे महती परम्परा वर्तते। ग्रन्थीकृतं विशदम् अध्ययनम् अस्य शास्त्रस्य सम्बन्धे अस्माकं पूर्वजैः समुपस्थापितम्। महत्प्रमाणम् एतस्याः परम्परायाः एतदेव यत् इह व्याकरणानाम् अष्टौ प्रस्थानानि बभूवुः। तेषां प्रस्थानानां ये प्रमुखाः तेषां नामानि अधोलिखितेन प्रकारेण निर्दिष्टानि प्राप्यन्ते –

**इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।**
**पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ च शाब्दिकाः॥ इति**

सुतराम् एतावता प्रकटीभवति यत् वैयाकरणानाम् एकः परमप्रसिद्धनामा पाणिनिः बभूव इति। पाणिनेः व्याकरणस्य अष्टाध्याय्यात्मकस्य धातुपाठ-गणपाठ-लिङ्गानुशासनादिसंबलितस्य तावान् प्रभावः समजनिष्ट यद् अन्यानि व्याकरणानि गृहीतावकाशानि इव जातानि, लोचनगोचरीभावं विमुच्य माकिं नामावशेषाणि बभूवुः।

लोकोत्तर-प्रतिभावता भगवता पाणिनिना यत् अकारि तत् संसारे सम्प्रत्यपि तस्य अतुल्यत्वं प्रतिष्ठापयति। अनेन अष्टाध्यायी-नामा विशिष्टः व्याकरण-सूत्रग्रन्थो व्यलेखि। तत्र चतुस्सहस्रप्रायाणि सूत्राणि, लघूनि महान्ति च विलसन्ति। तानि च सर्वाणि प्रत्येकं चतुर्षु पादेषु विभक्तैः अष्टाभिः अध्यायैः समाप्तानि इति अष्टानाम् अध्यायानां समाहारः सः ग्रन्थः अष्टाध्यायी इत्यभिधीयते। धातुपाठगणपाठादयः अपि पाणिनिना व्यलेखिषत। सर्वे च अमी प्रयासाः अष्टाध्यायीग्रन्थम् एव परिपुष्णन्ति।

खृष्टशतकारम्भात् सप्तमे पञ्चमे वा प्राग्वर्तिनि शतके समुत्पन्नतया निर्धारितः सोऽयम् भगवान् पाणिनिः पूर्ववर्तिनाम् अनेकेषां व्याकरणानां चिन्तनप्रसूनानि उपायोजिषत इति अष्टाध्याय्याः अन्तः साक्ष्यात् सिद्धम् भवति। उच्चैरुदात्तः (१.२.२९) नीचैरनुदात्तः (१.२.३०) इत्यादीनि प्रातिशाख्यतो यथावद्गृहीतानि अतिरिच्य अवङ्स्फोटायनस्य (६.१.१२३) वासुप्यापिशलेः (६.१.९२), लोपः शाकल्यस्य (८.३.१९) ओतो गार्ग्यस्य (८.३.२०) दीर्घादाचार्याणाम् (८.४.५२) प्रभृतीनि सूत्राणि इह प्रमाणभूतानि सन्ति।

दिनेषु गच्छत्सु नितरां प्रवहणशीलाया संस्कृत-वाग्धारायाः मध्ये बहुत्र परिवर्तन-योग्यानि नवीनतया योज्यानि च अनेकानि तत्त्वानि सञ्जातानि, तानि च ई. प्राक्तृतीयशतकभवेन महात्मना कात्यायनेन अन्वभाविषत। तत्र किमपि अनुरूपं चिकीर्षुणा तेन अनेके पूरकाः नियमाः निरमायिषत, यानि वार्तिकानि कथ्यन्ते। 'शश्छोऽटि (८.४.६८) इति शकारस्य छकारविधायके सूत्रे 'छत्वममीति वाच्यम्' इति वार्तिकम्, तुल्यास्यप्रयत्नं सवर्णम्

(अनुसन्धानम् ३ पृष्ठे...)

# मासवार्ता

## आयोजितानि व्याख्यानानि




संस्कृतरसिकाः संस्कृतसाहित्यस्य परिचयं प्राप्नुयुः इति विचार्य संस्कृतविद्याप्रतिष्ठानं चेरिटेबलट्रस्ट, एकलव्य-संस्कृत-एकेडेमी, अमदावाद-संस्कृत-एकेडेमी इत्येतेषां संयुक्तोपक्रमेण संस्कृत-साहित्य-रसास्वाद-व्याख्यानमालायाः आयोजनम् अभवत् । कार्यक्रमेऽस्मिन् जुलाईमासस्य ३ दिनाङ्के डॉ. किन्नरी पञ्चोली ''भासविरचितं प्रतिज्ञायौगन्धरायणम्'' इति विषये, जुलाईमासस्य १० दिनाङ्के डॉ. अमृतलालः भोगायता ''संस्कृत के अन्योक्ति काव्यों में पशुओं के व्यवहार से मानवजीवन दर्शन'' इति विषये, जुलाईमासस्य १७ दिनाङ्के डॉ. आनन्दः पण्ड्या ''भारतीय दर्शनशास्त्र का परिचय'' इति विषये, जुलाईमासस्य २४ दिनाङ्के श्रीभाविन् पाठकः ''मेजिक ऑफ पाणिनीयव्याकरणम्'' इति विषये, जुलाईमासस्य ३१ दिनाङ्के श्रीकल्पेशः जोशी ''यज्ञक्रिया - एक विज्ञान'' इति विषये च मनोहरं व्याख्यानं प्रायच्छन् । व्याख्यानानि श्रुत्वा संस्कृतरसिकाः सन्तुष्टाः आसन् ।

## विदेशीयछात्राणां कृते आरब्धाः संस्कृतवर्गाः




विदेशीयछात्राणां कृते एकलव्य-संस्कृत-एकेडेमीसंस्थानेन online संस्कृतवर्गाः आरब्धाः सन्ति । आयोजनेऽस्मिन् बालकानां कृते बालसंस्कृतवर्गाः ज्येष्ठानां कृते संस्कृतभाषाशिक्षणस्य वर्गाः च आरब्धाः सन्ति । आरब्धेषु विविधेषु अभ्यासक्रमेषु इदानीं यावत् ४७ छात्राः संस्कृतभाषायाः अध्ययनम् आरब्धवन्तः सन्ति ।

## कृपया हसन्तु

'प्रकाश:' इति विषयं पाठयितुं कश्चन शिक्षक: सिक्थवर्तिकां प्रज्वाल्य छात्रान् अपृच्छत् - "भो: छात्रा:, वदन्तु अयं प्रकाश: कुत: आगत: ?" एकोऽपि छात्र: उत्तरं न अददात् ।

तत: वर्गे अन्तिमे उपविष्ट: नमन: उत्थाय सिक्थवर्तिकासमीपम् आगत्य फुत्कारेण सिक्थवर्तिकां निर्वाप्य शिक्षकं प्रति अपृच्छत् - "महोदय ! इदानीं भवान् वदतु अयं प्रकाश: कुत्र गत: ?" इति ।

★ ★ ★ ★ ★

रमण: नमनम् उद्दिश्य दूरवाण्या सन्देशम् अलिखत् - 'अहं पञ्चनिमेषेषु आगच्छामि । मम प्रतिक्षां करोतु' इति । एतत् पठित्वा नमन: रमणं प्रति सन्देशम् अलिखत् - 'यदि भवान् पञ्चनिमेषेषु न आगमिष्यति तर्हि ?' 'मम सन्देशं पुन: पठतु' इति अवदत् रमण: ।

★ ★ ★ ★ ★

'हिमालयं मस्तकोपरि संस्थाप्य अहं मम ग्रामं प्रति नेतुं शक्नोमि' इति नमन: सर्वत्र उदघोषयत् । एतत् श्रुत्वा केचन पत्रकारा: तस्य साक्षात्काराय तत्र आगता: । तदा तान् दृष्ट्वा नमन: अवदत्- "केवलं हिमालयं मम मस्तकोपरि स्थापयितुं कोऽपि सहयोगं कुर्यात् तर्हि एतत् शक्यम्" इति ।

★ ★ ★ ★ ★

नमन: - (आपणिकं प्रति) एककिलोपरिमितां शर्करां ददातु ।
आपणिक: - अन्यत् किम् इच्छसि... ?
नमन: - सर्वकारीयवृत्तिम्... ।

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**अवृत्तिकं त्यजेद्देशं वृत्तं सोपद्रवां त्यजेत् ।**
**त्यजेन्मायाविनं मित्रं धनं प्राणहरं त्यजेत् ॥**

**तात्पर्यम्** – यस्मिन् देशे क्षेत्रे वा धनार्जनस्य साधनं नास्ति, नरः तं देशं त्यजेत्, यस्मिन् व्यापारे कार्ये च अनेकाः आपदः सन्ति तत् कार्यमपि जनः त्यजेत्, मित्रं कपटयुक्तम् अस्ति तन्मित्रम् अपि नरः त्यजेत् अपि च यत् धनं प्राणघातकम् अस्ति तत् धनम् अपि नरः त्यजेत्।

**उत्तमानेव सेवेत प्राप्तकाले तु मध्यमान् ।**
**अधमांस्तु न सेवेत य इच्छेत् भूतिमात्मनः ॥**

**तात्पर्यम्** – यः सम्पत्तिं प्राप्तुम् इच्छेत् सः उत्तमान् जनान् एव आश्रयेत्। प्राप्ते काले मध्यमान् आश्रयेत्। किन्तु कदापि अधमान् जनान् न आश्रयेत् एव।

**उत्तमे च क्षणं कोपो मध्यमे धटिकाद्वयम् ।**
**अधमे स्यादहोरात्रं पापिष्ठे मरणान्तकः ॥**

**तात्पर्यम्** – उत्तमेषु कोपः भवति क्षणिकः । मध्यमेषु घटिकाद्वयं (घटिका – २४ निमेषाः) यावत् कोपः तिष्ठेत्। अधमेषु अहोरात्रं भवेत्। अधमाधमेषु आजीवनं कोपः तिष्ठेत्।

## ज्ञानसरिता

श्यामः पटेलः

**मधुमक्षिका** – मधुमक्षिका एकलक्षकिलोमीटरमितं यावन्तं प्रवासं कृत्वा लक्षाधिकपुष्पाणामुपरि विहारं कृत्वा मधुनिमित्तं रसं पिबति। तदा तेन परिश्रमेण केवलं ५०० ग्रामपरिमितम् एव मधु सम्भवति। मधुमक्षिकायाः पक्षः एकक्षणे एकादशसहस्रवारम् आस्फालितः भवति । तथा च सा एकघण्टात्मके काले २२ किलोमीटरमितां यात्रां कतुमर्हा । मधुमक्षिकायाः चत्वारः पक्षाः भवन्ति । सा षट्पदी अपि कथ्यते । यतः षट्पादयुक्ता भवति । मधुमक्षिकानाम् अस्तित्वं वैज्ञानिकैः न्यूनातिन्यूनम् एककोटिवर्षेभ्यः पूर्वतनं मतम् अस्ति । मधुमक्षिका एकस्मिन् प्रवासे शताधिकेभ्यः पुष्पेभ्यः पुष्परसं नीत्वा मधुकोशम् आगच्छति । तत्र रसं संस्थाप्य पुनर्गच्छति । मधुमक्षिकाः पुष्पाणि दर्शयितुं मधुमक्षिका नरीनृत्य सूचयति। मधुमक्षिकानां महिषी प्रतिदिनं २००० यावतः अण्डान् प्रसूयते। सा प्रसूतिं कुर्वती नान्यद् कार्यं करोति ! मधुमक्षिकायाः दंशः किञ्चित् विषाक्तः भवति । मधुनः विषस्य उपयोगः औषधार्थम् अपि भवति । एषा चिकित्सापद्धतिः 'एपीथेरापी' इति उच्यते । वातावरणपुष्पाणां भिन्नत्वात् मधुनः आस्वादः वर्णश्च भिन्नः भवति। मधुमक्षिका स्वच्छतायाः प्रतीकरूपा अस्ति। तासां मधुपटलस्य अहोरात्रं स्वच्छतां कर्तुं काश्चित् मधुमक्षिकाः नियोजिताः भवन्ति। तासां मृत्युः अपि मधुपटलात् बहिः एव भवेत् तदर्थं मरणासन्ना मधुमक्षिका स्वयं मधुपटलं त्यजति । मधुमक्षिकाः गुडाकेशाः भवन्ति ! अर्थात् ते कदापि शयनं न कुर्वन्ति । पुंस्त्वधृताः मधुमक्षिकाः प्रजोत्पत्तिं कर्तुं तत्र मधुपटले वसन्ति। अनन्तरं जर्जरिते देहे तेऽपि मधुपटलात् निष्कासितव्याः भवन्ति।

पक्षः – wing, आस्फालितः – flapped, महिषी – queen

## शब्दमञ्जूषा

| | |
|---|---|
| **सूक्ष्मांशः** | particle |
| **अनुच्छेदः** | passage |
| **मौक्तिकम्** | pearl |
| **अनुज्ञा** | permission |
| **तीर्थयात्रा** | pilgrimage |
| **वृक्षारोपणम्** | planting |
| **नाटकम्** | play |
| **हलम्** | plough |
| **विषम्** | poison |
| **आरक्षकः** | police |
| **नीतिः** | policy |
| **मतदानकेन्द्रम्** | polling station |
| **राजनीतिः** | politics |
| **रजः** | pollen |
| **तडागः** | pond |

## किं भवन्तः जानन्ति ?

**१ ) प्रबोधिनी एकादशी कदा भवति ?**

(क) कार्तिकशुक्लपक्षे (ख) आश्विनकृष्णपक्षे

(ग) फाल्गुनशुक्लपक्षे (घ) चैत्रकृष्णपक्षे

**२ ) भगवतः बुद्धस्य जन्म कस्मिन् मासे कस्यां तिथौ च अभवत् ?**

(क) चैत्रपूर्णिमायाम् (ख) ज्येष्ठपूर्णिमायाम्

(ग) वैशाखपूर्णिमायाम् (घ) श्रावणपूर्णिमायाम्

**३ ) भगवतः महावीरस्य जन्म कस्मिन् मासे कस्यां तिथौ च अभवत् ?**

(क) वैशाखकृष्णनवम्याम् (ख) चैत्रशुक्लत्रयोदश्याम्

(ग) वैशाखशुक्लत्रयोदश्याम् (घ) श्रावणामावस्यायाम्

**४ ) नानकदेवस्य जन्म कदा जातः आसीत् ?**

(क) १५ अप्रैल १४६९ (ख) १२ अप्रैल १४५९

(ग) ११ अप्रैल १४६७ (घ) १७ अप्रैल १४६६

**५ ) भगवान् महावीरः 'कैवल्यज्ञानं' कस्यां तिथौ प्राप्तवान् ?**

(क) चैत्रशुक्लनवम्याम् (ख) आश्विनशुक्लपञ्चम्याम्

(ग) वैशाखशुक्लदशम्याम् (घ) फाल्गुनामावस्याम्

उत्तराणि – (१) क (२) ग (३) ख (४) क (५) ग

## अस्माकम् आगामिकार्यक्रमाः

**EKLAVYA SANSKRIT ACADEMY**
|| जयतु संस्कृतं जयतु भारतम् ||

**Learn Online**

# संस्कृतभाषाशिक्षणम्

(Level 2)

| | | |
|---|---|---|
| **Date** | : | 11/8/21 to 15/11/21 |
| **Day** | : | Mon-Wed-Fri |
| **Time** | : | 6:30 pm to 8:00 pm (IST) |
| **Fees** | : | 5000/- |

# संस्कृतभाषाशिक्षणम्

(Level 3)

| | | |
|---|---|---|
| **Date** | : | 11/8/21 to 15/11/21 |
| **Day** | : | Mon-Wed-Fri |
| **Time** | : | 7:00 am to 8:30 am (IST) |
| **Fees** | : | 6000/- |

**Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

संस्कृत-
**साम्प्रतम्**

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | – 100 |
| द्वैवार्षिकं रू | – 175 |
| त्रैवार्षिकं रू | – 250 |
| अङ्कमूल्यं रू | – 10 |

**EKLAVYA SANSKRIT ACADEMY**
|| जयतु संस्कृतं जयतु भारतम् ||

- શું તમે સંસ્કૃત બોલવા માંગો છો?
- શું તમે સંસ્કૃત ભાષાનાં ઉત્તમ શિક્ષક બનવા માંગો છો ?
- શું તમે સંસ્કૃતને સંસ્કૃત માધ્યમમાં ભણાવવા માંગો છો ?
- શું તમે સંસ્કૃતક્ષેત્રે ઉત્તમ કારકીર્દિ બનાવવા માંગો છો ?

તો અહીં છે, એક તક એકલવ્ય સંસ્કૃત એકેડેમી દ્વારા આયોજીત

# "Diploma In Sanskrit Teaching"

**શ્રીસોમનાથ સંસ્કૃત યુનિવર્સિટી** માન્ય કોર્ષમાં
ભાગ લો અને ઉત્તમ શિક્ષક બનો.

- કોઈપણ પ્રવાહમાં ધોરણ ૧૨ પાસ, પ્રવેશને યોગ્ય.
- મર્યાદિત ૨૫ બેઠકો.
- પ્રવેશપત્ર કોરહાઉસ, ઓફ. સી જી રોડ ખાતે ઉપલબ્ધ.

**અભ્યાસક્રમની વિશેષતાઃ**

→ તાલીમ માટેનું ગુણવત્તાયુકત વાતાવરણ.
→ પ્રત્યક્ષપદ્ધતિ દ્વારા શિક્ષણ.
→ અનુભવી શિક્ષકો દ્વારા શિક્ષણ.
→ શ્રેષ્ઠ તાલીમાર્થીઓ માટે નોકરીની ઉત્તમ તક.

વધુ માહિતી માટે સંર્પક કરોઃ ડો. મિહિર ઉપાધ્યાય **9824616237**

**प्रियवाचकाः**
- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

**EKLAVYA SANSKRIT ACADEMY**
|| जयतु संस्कृतं जयतु भारतम् ||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006